5. Hafta

# विनायकः

अयं कः? अयं विनायकः। अस्य पिता कः? अस्य पिता शिवः। अस्य माता का? अस्य माता पार्वती। अस्य भ्राता स्कन्दः।

पश्य! विनायकस्य शरीरं नरस्येव आननं गजस्येव च वर्तते।

अतोऽयं ‘गजाननः’ इति नाम भजते। यद्यप्यस्य आननं गजस्येव वर्तते तथाप्यस्य दन्त एक एव। गजस्य तु द्वौ दन्तौ स्तः। गजस्येवास्य मुखे शुण्डा विद्यते।

विनायको विघ्नानां राजा। अतो विद्यारम्भकाले बालास्तं नमन्ति।

तथा नम्यमानाः स विघ्नान् अपोहति। गोविन्दः प्रतिदिनं विनायकं पूजयति। तेन स निर्विघ्नं सर्वाणि कार्याणि साधयति। त्वमपि प्रत्यहं विनायकं पूजय। तवापि सर्वस्मिन् कर्मण्यविघ्नं भविष्यति।